**Shodhshauryam, International Scientific Refereed Research Journal**
Available online at : **www.shisrrj.com**
OPEN ACCESS
© 2024 SHISRRJ | Volume 7 | Issue 4
ISSN : 2581-6306
**doi :** https://doi.org/10.32628/SHISRRJ

# भाषाधिगमे भाषाप्रयोगशालाया: उपयोगिता महत्त्वञ्च

डॉ. हृषीकेशः दलाई
सहाचार्यः, शिक्षाविभागः, क.क.स.वि. रामटेकम्

**Article Info**

Received : 03 Aug 2024
Published : 30 Aug 2024

**Publication Issue :**
July-Aug-2024
Volume 7, Issue 2

**Page Number :** 77-80

**शोधसारांश:** – मानवजीवनस्य सार्थकतां भाषा एव प्रकटयति। संस्कृतभाषा मानवजीवने विकासस्य परिचायिका सती यावच्छुद्धा, स्पष्टा, तावत्सा आशयाभिव्यक्तौ न नु समर्था भवति। अत: परिशुद्ध संस्कृतभाषाज्ञानार्थं सम्प्रति प्राय: सर्वेषु विद्यालयेषु इतरविषयै: सह संस्कृतविषय: अनिवार्यतया भाषाध्यापनं प्रचलति। तत्र केचन छात्रा: संस्कृतभाषा लेखनं जानन्ति परन्तु सम्भाषणकौशले निपुणा: न भवन्ति, पुन: केचन: सम्भाषणं जानन्तोSपि यथार्थोच्चारणं कर्तुं समर्था: न भवन्ति। अत: एतासां समस्यानां निवारणार्थं सामूहिक भाषाशिक्षणार्थम् उपाचारात्मकशिक्षणार्थं च भाषाप्रयोगशाला विशेष महत्त्वं धत्ते। संस्कृतभाषाधिगमे विभिन्नध्वनीनाम् उच्चारणस्य स्थानं, संस्कृतसम्भाषणं, शुद्धोच्चारणं, श्लोकपठनं, नाटकानां, संवाद:, आदर्शवाचनम् इत्यादीनाम् अभ्यासार्थं भाषाप्रयोगशालाया: अत्यन्तम् उपयोगिनी भवति।

**विशेषशब्दा:–** भाषाधिगम:, भाषाप्रयोगशाला, अभिव्यक्ति:, ध्वन्यात्मकशब्द:, ध्वनिमुद्रणयन्त्रम्, सङ्केताङ्क:, सम्प्रेषणकौशल, वैयक्तिकनिर्देशनम् इत्यादय:।

**प्रस्तवना –** विश्वेऽस्मिन् सकलचराचरेषु मानवा: विशिष्टा: वर्तन्ते। अस्य कारणं तु भाषाया: प्रभाव: भवति। ध्वनिसङ्केतानां माध्यमेन य: कोऽपि मानवसमूदाय: यया परस्परं विचार-विकार अभिव्यक्ति: करोति सा भवति भाषा। विश्वे त्रिसहस्राधिका: भाषा: वर्तन्ते। सर्वास्वेतासु भाषासु संस्कृतभाषा अतिप्राचीना, वैज्ञानिकी, वेद- वेदाङ्ग-उपनिषद-इतिहास-पुराण-दर्शन-काव्यादिभि: समृद्धा च वर्तते। अत एव अन्यासु भाषासु संस्कृतभाषा विशिष्टा सुसम्पन्ना इति अभिज्ञायते।

भाषाया: विज्ञानं सर्वाङ्गं व्याकृतात्मकम्।
विज्ञानदृष्टिमूलं तत् भाषाविज्ञानमुच्यते।।

भाषा इति शब्द: भाष् वक्तायां वाचि इत्यस्मात् धातो: गुरोश्च हल: इति सूत्रेण अ प्रत्यये टापि कृते निष्पन्नत्वं भजते। भाषा भावाभिव्यक्तये मुख्यं साधनमिति सर्वै: स्वीक्रियते। मानवसभ्यतासंस्कृत्योश्च विकासे भाषाया: स्थानम् अवर्णनीयमस्ति। व्यक्ति: प्रयुज्यमान भाषां श्रुत्वा तस्य ज्ञानं सभ्यताश्च मापयितुं शक्यते। भाषा मानवजाते: सर्वस्वमस्ति, अत: भाषा रस: इति नाम्ना ख्याता भवति। ऋग्वेदे इयं भाषा अमृतस्य केन्द्रम् देवानां जिह्वा चापि कथिता वर्तते। बहव: पण्डिता: भाषाया: निर्वचनं दत्तवत्व:। यथा-
**स्वीट् महाभागानुसारं –** ध्वन्यात्मकशब्दै: बिचाराणां प्रकटीकरणमेव भाषा। काव्यादर्शकर्ता आचार्यदण्डिना काव्यादर्शे प्रतिपादितं यत् – ''**वाचामेव प्रसादेन लोकयात्रा प्रवर्तते**'' इति। तथा वेतेऽपि वरीवर्ति यत्-

**चत्वारि वाक्परिमिता पदानि तानि विदुर्ब्रह्मणा ये मनीषिण:।**
**गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति।। (ऋग्वेद 1/164/45)**

**Copyright © 2024 The Author(s):** This is an open-access article distributed under the terms of the Creative Commons Attribution **4.0 International License (CC BY-NC 4.0)** which permits unrestricted use, distribution, and reproduction in any medium for non-commercial use provided the original author and source are credited.

इति भाषायाः निर्वचनविषये अमरसिंहेन एवं प्रतिपादितं यत् ब्राह्मी तु भारती भाषा इति। व्यक्तवाग्रूपेण यस्याः अभिव्यक्तिः क्रियते सा भाषेति कथ्यते। अथा सा भाषणाद् हि भाषा इत्यपि कथ्यते। **सुकुमारसेन भाषते** – अर्थवान् कण्ठोद्धीर्णवाण्याः समष्टिः भाषा इति। गुणो महाशयः एवमब्रवती– ध्वन्यात्मशब्दानां द्वारा हृद्गदृतभावानां विचारणामभिव्यक्तिः एव भाषा इति। काब्यादर्शकर्त्ता आचार्यदण्डिना निगदितं यत्–

**इदमन्धं तमः कृत्स्नं जायते भुवनत्रयम्।**

**यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते।। (काव्यादर्श 1/4)**

भाषा व्यवहारमाध्यमेन अभिप्रायम् अभिव्यञ्जति। मानवजीवने विकासस्य परिचायिका सती यावच्छुद्धा, स्पष्टा, तावत्सा आशयाभिव्यक्तौ नतु समर्था भवति। अतः परिशुद्धभाषाज्ञानार्थं सम्प्रति सर्वेषु विद्यालयेषु इतरविषयैस्सह अनिवार्यतया भाषाध्ययनं प्रचलति। भाषाध्ययने महती अभ्यासस्य आवश्यकता वर्तते। अतः सर्वासां समस्यानां निवारणार्थं भाषाप्रयोगशाला समाविष्कृता। एतस्या:आविष्कारः सर्वादौ 1960 तमे वर्षे आमेरिका देशे समभवत्। सम्प्रति सर्वेषु देशेषु विदेशीयभाषाणां भारते मातृभाषेतरभाषाणाम् अध्ययनार्थं भाषाप्रयोगशालायाः उपयोगः क्रियमाणः वर्तते।

**भाषाप्रयोगशालायाः अर्थः –** भाषाप्रयोगशाला विद्युगियन्त्रिनः कश्चन शिक्षणप्रकोष्ठः यस्य प्रयोगः सामूहिकरुपेण भाषाशिक्षणार्थं क्रियते। अत्र छात्राः एकत्र उपविश्य भाषाभ्यासं कुर्वन्ति। वैयक्तिकनिर्देशनञ्च प्राप्नुवन्ति। अत्र उपवेशनार्थं पृथक पृथक आसनव्यवस्था भवति। प्रत्येकम् आसन्दोपरि श्रवणयन्त्रं ध्वनिमुद्रणयन्त्रं च संलग्नं भवतः। भाषाप्रयोगशालायाः परिवेशः बाह्यकोलाहलात् मुक्तः भवति। अत्र अध्यापकः स्वस्थाने एव स्थित्वा छात्रस्य छात्राणां वा उच्चारणादिदोषान् संशोधयितुं शक्नोति। एतेन कथनेन स्पष्टं भवति यत् – भाषाप्रयोगशाला विशेषविधिना यन्त्रैः वा सज्जितः कश्चन शिक्षणप्रकोष्ठः, यत्र भाषायाः शिक्षा प्रदीयते।

**शिक्षणे भाषाप्रयोगशालायाः आवश्यकता-** भाषाप्रयोगशाला भाषाशिक्षणार्थम् अतीवोपकारिणी वर्तते। शाव्दिकशक्तयः प्रतिव्यक्तिभिन्नाः भवन्ति। अत्र उच्चार्यमाणभाषायाः अनुरोधेन वर्णानां लिपिः निर्मीयते। भाषाप्रयोगशालायां मौखिकीं भाषां श्रुत्वा प्रतिक्रियां कर्तुं, ध्वनीनाम् अनुकरणेन अभ्यासं कर्तुं, दोषाणां निवारणेन सम्यक् भाषितुञ्च छात्रः समर्थो भवति। अश्रुतपूर्वायाः नूतनभाषायाः अध्ययनकार्ये छात्रणामुत्साहं संरक्षितुं , अध्यापकस्य क्लेशं परिहर्तुं च भाषाप्रयोगशाला नितराम् उपयुज्यते।

**भाषाप्रयोगशालायाः सम्प्रत्ययः –** भाषाप्रयोगशालायाः प्रकृतिं स्वरूपं च अवगन्तुं तत्सम्प्रत्ययः अवश्यं ज्ञातव्यः। अतः अत्र केचन सम्प्रत्ययाः अधः विव्रीयन्ते –

1. विकसितप्रयोगशालासु मुद्रितभाषणेन व्याख्यानेन वा छात्रेभ्यः अनुदेशनम् आदौ प्रदीयते।
2. अत्र छात्राःध्वनिग्रहणयन्त्रमाध्यमेन पठितभाषासु उक्तानि पदानि वाक्यानि च शृणवन्ति।
3. अत्र कथयितुः शब्दान् वाक्यानि च द्वित्रवारं श्रोतुं ध्वनिमुद्रणयन्त्रस्य स्थगनं मध्ये मध्ये क्रियते।
4. अनन्तरं प्रश्नोत्तराभ्यासेन पाठः पाठ्यते।

**भाषाप्रयोगशालायाः उपयोगिता-** एषा प्रयोगशाला वैयक्तिकभिन्नतागुणं भाषाभ्यासार्थं छात्रान् सहकरोति। अध्यापकस्य अभावे अपि छात्राः स्वयं भाषाभ्यासं कर्तुं शक्नुवन्ति। प्रयोगशालायामेव भाषाभ्यासार्थम् अधिकतया पुनरावृत्तिः भवितुमर्हति। तत्र भाषाभ्यासार्थम् अधिकसमयः लभ्यते। तथा च छात्राः स्वीयदोषान् सम्यगवगन्तुं शक्नुवन्तिः। अन्येषाम् अवरोधं विना अध्यापकः सयन्त्रं छात्रेभ्यः वैयक्तिकानुदेशनं दातुं प्रभवति। छात्राः स्वेच्छया साधनानि चित्वा स्वगत्या अध्येतुं शक्नुवन्ति, तथा श्रुत्वा उच्चारयितुमत्र समुचितः अवकाशाः विद्यते।

**भाषाप्रयोगशालायाः विशेषता-** भाषाकौशलानि अभ्यासनैव प्राप्तुं शक्यन्ते। अतः ध्वनीनामनुकरणम् अभ्यासश्च उच्चारणकौशलप्राप्तौ प्रधानां भवतः। भाषाप्रयोगशाला आवृत्तिं सम्पादयितुम् अवसरं कल्पयति। छात्रः स्वशक्त्यानुसारमल्पसमये तीव्रगत्या वा अधिकसमये मन्दगत्या वा अभ्यासं कर्तुं शक्नोति। छात्राणां वैयक्तिक भेदानामाधारेण अधिगमे पूर्णता सम्पादयितुं शक्यते। समृद्धायां भाषाप्रयोगशालायां छात्राणामध्ययनसाधनानां चयनञ्च स्वातन्त्र्यं भवति। परन्तु यत्र परिमितानि साधनानि भवन्ति, तत्र तु उपलब्धैरेव साधनैः कार्यं सम्पादनीयं भवति।

**भाषाप्रयोगशालायाः प्रक्रिया**– भाषाप्रयोगशालायाम् अध्यापकः केन्द्रस्थाने स्थित्वा कार्यक्रमं प्रसारयति। छात्राः श्रुण्वन्ति। अध्यापकः एव कार्यक्रमस्य निर्णायकः। छात्राणां तत्र स्वेच्छा नास्ति। छात्राः केन्द्रस्थानात् स्वरुच्यनुसारं ध्वनिमुद्रिकाः स्वप्रकोष्ठं नीत्वा उपयुज्यन्ते। ताः मुदायित्वा अनेकवारं श्रृण्वन्ति। अभ्यासं कुर्वन्ति च। सङ्केताङ्कद्वारा स्वयञ्चालनपद्धत्या किमपि कार्यक्रमं श्रोतुं शक्नोति। परन्तु ग्रन्थालयविनियोगपद्धत्यामिव कामपि ध्वनिमुद्रिकां मध्ये एव स्थापयितुं वा कमपि भागं पुनः श्रोतुं वा न शक्नोति। एवं कोऽपि छात्रः सङ्केताङ्कद्वारा कमपि कार्यक्रमं प्राप्तुमर्हति।

**भाषाप्रयोगशालायाः प्रकृतिः** - श्रव्यनिष्क्रियप्रयोगशालायां केवलं श्रवणस्य व्यवस्था भवति। अत्र एकस्मिन् पार्श्वे ध्वनिवर्धनम्, अपरस्मिन् पार्श्वे छात्रस्य निमित्तं श्रवणयन्त्रं भवति। यथा ग्रन्थालयात् छात्रः पुस्तकं स्वीकृत्य पठित्वा प्रत्यर्पयति। शिक्षकः अनन्तरं वा ध्वनिमुद्रिकां श्रुत्वा छात्राणां दोषान् ज्ञातुं शक्नोति। भाषाप्रयोगशालायां सम्प्रेषणकौशलस्य सम्वर्धनं भवति। प्रत्येकस्यां भाषायां केचन अनुवर्तनीयाः भवन्ति। भाषायाः अभ्यासः असकृत् अनुकरणेन सम्पाद्यते। अतः केचन विषयाः बहुवारम् अभ्यसनीयाः भवन्ति। एकैकः छात्रः अपि स्ववेगेन अधिगन्तुं शक्नोति।

**भाषाप्रयोगशालायाः निर्माणम् –** भाषाप्रयोगशालायाः त्रयः विभागाः वर्तन्ते। तद्यथा –

क. श्रवणविभागः ख. सहायकविभागः ग. नियन्त्रणविभागः

**क. श्रवणविभागः-** भाषाप्रयोगशालायां छात्राणां कृते श्रोतुं षोडशतः आरभ्य विंशते पर्यन्तं प्रकोष्ठाः भवन्ति। प्रतिकोष्ठम् एका उत्पीठिका, एकः आसन्दः, एकं ध्वनिमुद्रणयन्त्रम्, एकं श्रवणयन्त्रणं च भवति। अध्यापकेन सह वार्तालापं कर्तुम् अन्तर्दूरवाण्याः सौलभ्यमपि भवति।

**ख. सहायकविभागः** - विभागेऽस्मिन् मुख्यध्वनिमुद्रिकाः भवन्ति। तेन अध्यापकः प्रयोगशालायां युगपत् सर्वैः सह एकेन सह वा सम्भाषितुं प्रभवति।

**ग. नियन्त्रणविभागः** - नियन्त्रणविभागे सर्वविधाः ध्वनिमुद्रिकाः भवन्ति। एवमेव छात्रदोषान् नियन्त्रियितुम् आवश्यकीयपरिकराः अपि भवन्ति। ततः एव छात्राणां नियन्त्रणम् अध्यापकः करोति।

**भाषाप्रयोगशालायाः सीमा –** भाषाप्रयोगशाला यद्यपि अस्मिन् आधुनिके काले अत्यन्तम् उपयोगिनी भवति, किन्तु एतस्याः उपयोगे काश्चन परिमितयः वर्तन्ते। तद्यथा –

1. श्रवणभाषणकौशलयोः कृते एव एतस्याः उपयोगः भवितुमर्हति, न तु पठनलेखनकौशलयोः।
2. अस्याः उपयोगः एकवारं 10 तः 20 छात्राणां कृते एव भवति।
3. एतदर्थम् अधिकधनव्ययः भवति।
4. अन्यविषयाणां बोधने इयं नोपकरोति।
5. अस्मिन् क्षेत्रे प्रशिक्षिताध्यापकाः विरलाः एव भवन्ति।

**भाषाप्रयोगशालायाः लाभाः-** छात्रः अध्येतव्यायाः भाषायाः निर्दिष्टं भाषणं सम्यक् पुनः पुनः श्रोतुं शक्नोति। अतः छात्रः यथार्थ सहजं भाषणं श्रुत्वा भाषामधीते। छात्रः न केवलमेकस्य अध्यापकस्यैव भाषणं , किन्तु अनेकेषां बहुविधं भाषणं श्रोतुं शक्नोति। छात्रस्य अभ्यासस्य सम्भाषणस्य कालः क्रमेण संवर्ध्यते। अन्ये स्वस्य सम्भाषणं न श्रुण्वन्ति इति कारणेन छात्रः सम्भाषणे लज्जां भीतिं वा न अनुभवति। अध्यापकस्य प्रोत्साहनेन, मार्गदर्शनेन च छात्रः सोत्साहं भाषामधीते। अध्यापकः यदा एकस्य छात्रस्य मार्गदर्शनं करोति, तदा अन्येषां छात्राणाम् अध्ययनस्य विघ्नो न भवति।

**संस्कृतभाषा पाठनसन्दर्भे भाषाप्रयोगशालायाः योगदानम्-** भाषा नैकप्रकाराःवरीवर्तन्ते। परन्तु तासु भाषासु व्यक्तवाक्भाषा भावाभिव्यक्तये शक्या भवति। वाक्भाषा नाम यत्र सर्वे वर्णाः व्यक्ताः स्पष्टाः सा एव व्यक्तावाक्भाषा इति उच्यते। यथा – संस्कृतम्। संस्कृतभाषा अमृतवाणी देववाणी इति नाम्ना प्रसिद्धा। संस्कृतभाषायां अस्मदीयाः धर्मग्रन्थाः सन्ति। संस्कृतभाषायाः शब्दसामर्थ्यञ्चाद्भुतमेवास्ति। भारतस्य पूर्वप्रधानमन्त्रिणः जवाहरलालनेहरु महोदयाः कथयन्ति यत्–

यदि कोऽपि मां पृच्छेद् यत् भारतस्य विशालमेव सम्पत्ति का .. एवञ्च उत्तराधिकाररुपेण भारते सर्वोत्तमं वस्तु किमधिगतम् तर्हि निस्संकोचरुपेणाहमुत्तरं दास्यामि यत् सा सम्पत्तिरस्ति संस्कृतभाषा तत् साहित्यञ्च। संस्कृतभाषाया: शिक्षणम् अस्मिन् समये विद्यालयेषु संस्कृतशिक्षकेभ्य: अभिग्रहपूर्णं कार्य वर्तते। यतो हि छात्रा: संस्कृतविषयं प्रति रुचिं न दर्शयन्ति तस्य कारणं एकमेव वर्तते यत् संस्कृतभाषाया: पाठनं रुचिपूर्णतया, आकर्षतया शिक्षकै: न क्रियते। संस्कृतपाठनं रुचिपूर्णं कर्तुं विभिन्न दृश्यश्रव्य सामग्रीणामुपयोग: करणीय:। तासु भाषाप्रयोगशाला संस्कृतभाषा कौशल विकासाय उत्तमं साधनं विद्यते। यतो हि अधुना विद्यालयस्य बहि: संस्कृतवातावरणं न लभ्यते। तेषां कृते तु कक्षा एव केवलं भवति। कक्षामतिरिच्य यदि भाषाप्रयोगशालाया: प्रयोग: भवति चेत् सर्वेषां छात्राणां कृते इयमन्तमुपयोगी भविष्यति।

भाषाप्रयोगशालाया: दृश्यश्रव्यसाधनेषु भाषाशिक्षणाय एकं सशक्तं साधनं वर्तते। भाषाप्रयोगशाला विद्युन्नियन्त्रिता एका कक्ष्या भवति। यस्यां कक्ष्यायां छात्रा: सम्भूय भाषाया: ज्ञानं प्राप्नुवन्ति तथा व्यक्तिगतनिर्देशमपि प्राप्नुवन्ति। अस्या: भाषाकक्षाया: सामग्र्या: प्रयोग: विद्यालयेषु च विद्यते। प्रथम भाषाप्रयोगशालाया: निर्माणं ग्रेनोबल विश्वविद्यालये 1950 तमे वर्षे अभवत्। 1990 पर्यन्तं तस्यां भाषाप्रयोगशालायां श्रव्याधारितं पठनं चलति स्म। अनन्तरं तत् स्थाने संगणकं समागतम्।

**शिक्षणयोजना-** भाषाप्रयोगशालायामुपकरणानां व्यवस्था दृष्ट्वा भाषाशिक्षणस्य योजना निर्मीयते। सामान्यत: व्यवस्थेयं द्विविधा भवति।

**क. एकमार्गीव्यवस्था।** **ख. द्विमार्गीव्यवस्था।**

एकमार्गीव्यवस्थां अभ्यासार्थं चतुर्णां सोपानानामनुकरणं क्रियते।

**क. श्रवणम्** **ख. अनुकरणम्** **ग. परीक्षणम्** **घ. पुनरावृत्तिश्च।**

द्विमार्गीव्यवस्थायामपि अभ्यासार्थं चत्वारि सोपानानि भवन्ति।

**क. प्रचालनं श्रवणञ्च** **ख. अनुकरणम् अभिलेखाङ्कनञ्च**

**ग. श्रवणं परीक्षणञ्च** **घ. पुनरावृत्ति: अभिलेखाङ्कनञ्च**

**उपसंहार:-** भाषाबोधने भाषाप्रयोगशाला विनुन्तान्वेषणं भवति। भाषाप्रयोगशाला द्वारा भाषाया: विभिन्नकौशलानि छात्रा: स्वेच्छया, स्वगत्या प्राप्तुं शक्नुवन्ति। यद्यपि भाषाप्रयोगशालासु प्रधानतया श्रवणभाषणोपकरणान्येव प्रयुज्यन्ते, तथापि कानिचित् दृश्यचित्राणि अपि दृश्योपकरणौ: प्रदर्शयन्ते। तेन छात्राणां भाषाध्ययनसामर्थ्यं वर्धते। शब्दार्थज्ञानं स्पष्टं भवति। भाषाप्रयोगशालाया: प्रयोजनानि मनसि निधाय यदि उपयुज्यते तर्हि अधिगन्तृणां श्रवणभाषणकौशलयो: विकास: अवश्यं सम्भवति। संस्कृतभाषाशिक्षणे विभिन्नध्वनीनामुच्चारणस्थानस्य, संस्कृतसम्भाषणस्य, शुद्धोच्चारणस्य, श्लोकपाठस्य, प्रार्थनाया:, नाटकानां, संवादस्य, आदर्शवाचनादीनां श्रव्यरुपं, दृश्यश्रव्यरुपं यान्त्रिकं निर्माणं व्ययसाध्यमस्ति, किन्तु तत् सामुहिक भाषाशिक्षणाय उपचारातीत्मकशिक्षणाय च लाभदायकं वर्तते।

**सहायकग्रन्था:**


1. डॉ. फतेह सिंह:-संस्कृतशिक्षणम्, केरलराज्यपाठ्यपुस्तकप्रणयन एवं प्रकाशनसंस्था, त्रिचुर: 1996.
2. डॉ. च. ल .ना. शर्मा, डॉ. फतेहसिंह: - संस्कृतशिक्षणम् - नवीनप्रविधयश्च, आदित्यप्रकाशनम्, जयपुरत: 2008.
3. S. K. Mangal & Uma Mangal - Essentials of Educational Technology - 2009
4. डॉ. एन. के. शर्मा - संस्कृत शिक्षण, के.एस.के. पब्लिशर्स एवं डिस्ट्रीब्यूटर्स, नई दिल्लीत: 2015.
5. डॉ. किशोरिलाल - भाषाशिक्षण तथा भाषाविज्ञान - 2015
6. डॉ. उदय शंकर झा - संस्कृतशिक्षणम्, चौखम्वा सुरभारती प्रकाशन, वाराणसीत: 2016.
7. डॉ. (श्रीमती) सन्तोष मित्तल - शैक्षिक तकनीकी एवं कक्षा - कक्ष प्रबन्ध - 2019.